# Shri Radhagunavarnanam

# શ્રીરાધાગુણવર્ણનમ્

## Document Information

Text title : Shri Radhagunavarnanam

File name : rAdhAguNavarNanam.itx

Category : devii, devI, brahmavaivartapurANa, rAdhA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | shrIkRRiShNajanma, uttarabhAga | adhyAya 124/80-96||

Latest update : March 29, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 29, 2025

*sanskritdocuments.org*

# શ્રીરાધાગુણવર્ણનમ્

શ્વેતચમ્પકવર્ણાભામતુલાં સુમનોહરામ્ ।
મોહિનીં માનસાનાં ચ મુનીનામૂર્ધ્વરેતસામ્ ॥ ૭૭॥

સુકેશીં સુન્દરીં શ્યામાં ન્યગ્રોધપરિમણ્ડલામ્ ।
નિતમ્બકઠિનશ્રોણીં સ્તનયુગ્મોન્નતાનનામ્ ॥ ૭૮॥

કોટીન્દુનિન્દિતાસ્યાં તાં સસ્મિતાં સુદતીં સતીમ્ ।
કજ્જલોજ્જ્વલરૂપાં ચ શરત્કમલલોચનામ્ ॥ ૭૯॥

મહાલક્ષ્મીં બીજરૂપાં પરામાદ્યાં સનાતીમ્ ।
પરમાત્મસ્વરૂપસ્ય પ્રાણાધિષ્ઠાતૃદેવતામ્ ॥ ૮૦॥

સ્તુતાં ચ પૂજિતાં ચૈવ પરાં ચ પરમાત્મને ।
બ્રહ્મસ્વરૂપાં નિર્લિપ્તાં નિત્યરૂપાં ચ નિર્ગુણામ્ ॥ ૮૧॥

વિશ્વાનુરોધાત્પ્રકૃતિં ભક્તાનુગ્રહવિગ્રહામ્ ।
મર્ત્યસ્વરૂપાં શુદ્ધાં ચ પૂતાં પતિતપાવનીમ્ ॥ ૮૨॥

સુતીર્થપૂતાં સત્કીર્તિં વિધાત્રીં વેદસામપિ ।
મહત્પ્રિયાં ચ મહતીં મહાવિષ્ણોશ્ચ માતરમ્ ॥ ૮૩॥

રાસેશ્વરેશ્વરીં રમ્યાં રસિકાં રસિકેશ્વરીમ્ ।
વહ્નિશુદ્ધાંશુકાધામાં સ્વેચ્છારૂપાં શુભાલયામ્ ॥ ૮૪॥

ગોપીભિઃ સપ્તભિઃ શશ્વત્સેવિતાં શ્વેતચામરૈઃ ।
ચતસૃભિઃ પ્રિયાલીભિઃ પાદપદ્મોપસેવિતામ્ ॥ ૮૫॥

અમૂલ્યરત્નનિર્માણભૂષણોઘૈર્વિભૂષિતામ્ ।
ચારુકુણ્ડલયુગ્મેન શ્રુતિગણ્ડસ્થલોજ્જ્વલામ્ ॥ ૮૬॥

સુનાસાં ગજમુક્તાર્હાં ખગેન્દ્રચઞ્ચુનિન્દિતામ્ ।
કુઙ્કુમાલક્તકસ્તૂરીસ્નિગ્ધચન્દનચર્ચિતામ્ ॥ ૮૭॥

દધાનાં સુકપોલં ચ કોમલાઙ્ગીં સુકામુકીમ્ ।
ગજેન્દ્રગામિનીં રામાં કામનીયાં સુકામિનીમ્ ॥ ૮૮॥

કામાસ્ત્રજયરૂપાં ચ કામકામ્યાલયાં વરામ્ ।
ક્રીડાકમલમમ્લાનં પારિજાતપ્રસૂનકમ્ ॥ ૮૯॥

અમૂલ્યરત્નનિર્માણં દધાનાં દર્પણોજ્જ્વલમ્ ।
નાનારત્નવિચિત્રાઢ્યરત્નસિંહાસનસ્થિતામ્ ॥ ૯૦॥

પદ્મૈઃ પદ્માર્ચિતં પાદપદ્મં ચ મઙ્ગલાલયમ્ ।
હૃત્પદ્મે ધ્યાયમાનં ચ કૃણસ્ય પરમાત્મનઃ ॥ ૯૧॥

કર્મણા મનસા વાચા સ્વપ્ને જાગરણેઽપિ ચ ।
તત્પ્રીતિં પ્રેમ સૌભાગ્યં સ્મરન્તીં નિત્યનૂતનમ્ ॥ ૯૨॥

ભાવાનુરક્તસંસક્તાં શુદ્ધભક્તાં પતિવ્રતામ્ ।
ધન્યાં માન્યાં ગૌરવર્ણાં શશ્વદ્વક્ષઃસ્થલસ્થિતામ્ ॥ ૯૩॥

પ્રિયાસુ પ્રિયભક્તેષુ સુપ્રિયાં પ્રિયવાદિનીમ્ ।
કૃષ્ણવામાઙ્ગસમ્ભૂતામભેદાં ગુણરૂપયોઃ ॥ ૯૪॥

ગોલોકવાસિનીં દેવદેવીં સર્વોપરિસ્થિતામ્ ।
વૃષભાનુસુતાખ્યાં તાં પુણ્યક્ષેત્રે ચ ભારતે ॥ ૯૫॥

ગોપીશ્વરીં ગુપ્તરૂપાં સિદ્ધિદાં સિદ્ધિરૂપિણીમ્ ।
ધ્યાનાસાધ્યાં દુરારાધ્યાં વન્દે સદ્ભક્તવન્દિતામ્ ॥ ૯૬॥

ઇતિ બ્રહ્મવૈવર્તપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે પૂર્વભાગે
ચતુર્વિંશાધિકશાધિકશતતમાધ્યાયાન્તર્ગતં શ્રીરાધા-
ગુણવર્ણનં સમાપ્તમ્ ।

બ્રહ્મવૈવર્તપુરાણ । શ્રીકૃષ્ણજન્મ, ઉત્તરભાગ । અધ્યાય ૧૨૪/૮૦-૯૬॥

brahmavaivartapurANa . shrIkRRiShNajanma, uttarabhAga . adhyAya 124/80-96..

Proofread by PSA Easwaran

*Shri Radhagunavarnanam*

pdf was typeset on March 29, 2025

Please send corrections to *sanskrit@cheerful.com*